Palm leaf. 18 × 1½ inches. Foll. 48. Lines 6 to 7 on a page. Telugu. Extent, 1,500 granthas. Slightly injured.

Purchased in 1938–39 from Srī Uppali Iyengar of Kumbakonam.

यादवाचलमाहात्म्यम् ।

YĀDAVĀCALAMĀHĀTMYAM.

A portion of the Nāradapurāṇa.

Same work as that described under D. No. 2506.

Complete in twelve Adhyāyās.

R. No. 6611

Palm leaf. 17 × 1¼ inches. Foll. 128. Lines, 6 to 8 on a page. Telugu. Injured.

Purchased in 1938–39 from T. Ramasawmi Iyengar of Tirunageswaram, Tanjore district.

आपस्तम्बश्रौतसूत्रवृत्तिः—सूत्रदीपिका by भट्टरुद्रदत्त ।

ĀPASTAMBAŚRAUTASŪTRAVṚTTIḤ—SŪTRADĪPIKĀ by Bhaṭṭarudradatta.

Foll. 1*a* to 118*a*. Extent, 3,500 granthas. Printed.

The other work herein is Prāyaścittakārikā, foll. 119*a*.

Same work as that described under D. 1062.

Contains praśnas 10 to 14 complete.

Fol. 118*b* is left blank.

Beginning :

ओम् । उक्ता यज्ञा हविर्यज्ञाः । उक्तानि चैषां प्रायश्चित्तानि । अथेदानीं समारभ्यते सोमः । सोऽपि नित्यः त्रिभिः ऋणवान् जायते । इत्य · · सं · · तावात् सोमान्तान् यज्ञाननुक्रम्य नैयमिकं ह्येतदृण-संस्तुतमिति वसिष्ठवचनात् । सूत्रकृतापि अग्नीनाधाय कर्माण्यारभ्यन्ते ।

End :

एतेषामेकस्मिन्नपि कर्मणि पूर्व(व)चनैरेव क्रियमाणे जुहुयादेते आहुतीः किं पुनः द्वयोः बहु वेत्यर्थः ।

Colophon :

दशमः पटलः ।

Colophon :

। इति भट्टरुद्रप्रणीतायामापस्तम्बसूत्रवृत्तौ सूत्रदीपिकायां चतुर्दशप्रश्नः समाप्तः ।

The Scribe adds :—

That the 7th Patala of the 13th Praśna has not been written here since that portion was not found in the original copy of this MS.

R. No. 6612

प्रायश्चित्तकारिका ।

PRĀYAŚCITTAKĀRIKĀ.

Foll. 119 to 125*a*. Extent, 125 granthas.

Begins on fol. 119*a* of the MS. described under the previous number

Similar to the work described under D. No. 3727

108 verses on expiatory ceremonies and how to conduct them.

Complete.

Foll. 124*a* to 128*b* contain a small portion of Āpastambaśrautasūtrabhaṣya and some miscellaneous matters.

Beginning :

गणेशं शङ्करं नत्वा कल्पकारं ततः परम् ।
प्रायश्चित्तानि वक्ष्येऽहं कर्मवैगुण्यशान्तये ॥

शार्ङ्गादिपरिसाम्ना चेत् प्रस्तोता सर्वतो यदि (?) ।
पुनर्गीत्वा तदाज्येन महाव्याहृतिभिर्हुवेत् ॥

End :

निमित्ते तु वृहत्तत्र शिवदिष्टवतिप्वलम् (?) ।
सोमाधिके सात प्राय[त]स्सवने ह्रासयेत्तथा ॥
. . .
माध्यं . . . . पृष्टगानेति तेन तत्सम्पादिष्यते ।
एवमेवान्ययोः कुर्युः स्तोत्रसाफल्यसंपदम् ॥

शेषं प्रकृतिवत्कर्म सवनेषु त्रिषूच्यते ।
इति प्रायश्चित्तवि . ये कारिकाष्टोत्तरं शतम् ॥

R. No. 6613

Palm leaf. 15⅜ to 16¼ × 1⅜ and 1½ inches. Foll. 85. Lines, 6 and 7 on a page. Grantha. Extent, 2,000 granthas. Injured. Printed.

Purchased in 1938-3 from Srī Cakravarti Jagannāthācāryar of Kumbakonam.

सिद्धान्तकौमुदीव्याख्या—बालमनोरमा by वासुदेवदीक्षित ।

SIDDHĀNTAKAUMUDĪVYĀKHYĀ—BĀLAMANORAMĀ by Vāsudevadīkṣitā.

Same work as that described under D. No. 1444.

Commences in the course of णेरनिटिसूत्रार्थ and breaks off in the end of Śabvikaraṇi or Bhvādi.

R. No. 6614

Palm leaf. 17¼ and 17½ × 1¼ inches. Foll. 80. Lines, 5 and 6 on a page. Grantha. Extent, 2,000 granthas. Fair. Printed.

Purchased in 1938-39 from Srī Jagannathācāryar of Cakravarti Kumbakonam.

दिनकरीयव्याख्या—तरङ्गिणी by रामरुद्रभट्टः ।

DINAKARĪYAVYĀKHYĀ—TARAṄGIṆĪ by Rāmarudrabhaṭṭa

Same work as that described under D. No. 3965.

Begins in the course of Pṛthivīlakṣaṇa and continues up to the end of Pratyakṣapariccheda.

R. No. 6615

Palm leaf. Size, 12¼ and 12⅜ × 1 and 1⅛ inches. Foll. 173. Lines, 5 on a page. Grantha. Extent, 1,750 granthas. Slightly injured.

Purchased in 1938-39 from Sri V. S. Desikācariar, Sirudamur Tindivanam.

कौमार्याद्युत्सवप्रतिष्ठाविधिः ।

KAUMĀRYĀDYUTSAVAPRATIṢṬHĀVIDHIḤ.

Incomplete.

On the process of sanctifying the image of Bhadrakāli, Hariharaputra, etc., for the purpose of worshipping in a temple. Some portions have been taken from Kārṇāgama, and some taken from Kāmikāgama.

Beginning :

பகுதான்யஹூ ஆவணிமீ 15உ சின்னதந்நா வாடியிலிருக்கும் சுப்பிரமணிய குருக்கள் கௌமாரீ உத்ஸவப்ரதிஷ்டாமூர்த்தம் எழுதிமுடிந்தது. அதற்கு விவரம் முதல் ஏடுகௌமாரீ திகப்ரவஜரீஷாவிதி; அர்ச்சனை. எட்டாம் ஏடு கௌமாரீ உத்ஸவாங்குரம. ரக்ஷாபந்தனத்தில் 20ம ஏடு கௌமாரீப்ரதிஷ்டாவிதி ரக்ஷாபந்தனம்.

This MS. deals with the following subjects :—

(1) कौमार्युत्सवाङ्कुरः ।

(2) भद्रकालिप्रतिष्ठा ।

(3) शास्तृस्थापनम् ।

(4) विघ्नेश्वरमूलम् ।

(5) सुब्रह्मण्यमूलम् ।

(6) दुर्गास्थापनम् ।

"यो ब्रह्माणं" इति मन्त्रेण रक्षां धारयित्वा तत्समये प्रोक्षणाद्युत्सव काले पुंविगृह्य [पुंविग्रहस्य] लिङ्गपीठस्य नालदेशे अस्त्रे दक्षिणदले वृषं तस्य शृङ्गे बलिपीठे कर्णिकामध्ये अन्येषां तत्स्थानेषु सूत्रं धारयित्वा प्रतिष्ठाकाले स्नपनान्ते धारयित्वा अष्टबन्धने बन्धनान्ते धारयित्वा ।

* * " * *

Colophon :

। इतिकारणे प्रतिष्ठातन्त्रे अग्निकार्यविधिपटलम् ।

End :

शालिमीशानमन्त्रेण नीवारं कवचेन वै ।
सक्तुकं पाशुपतेन सिद्धार्थं बीजमुख्यैः ।
हुनेद् दधि दशाक्षरेण मन्त्रेण तदुक्तं जुहुयात्ततः
अष्टाधि त्रिशतकं द्रव्यं प्रत्युक्तामाहुतिः ।
विंशताष्टाधिकं मध्यमष्टोत्तरशताधिकम् ।
व्याहृत्याहुतिकं

Colophon :

। इति कारणे प्रतिष्ठातन्त्रे ग्रामशान्तिविधिपटलः ।

Colophon :

। इति परमेश्वरापरनामधेयश्रीमद्वामदेवाचार्यविरचित शास्तापूजाविधिः समाप्तः ।

(R. Nos. 6616 to 6619 one bundle.)

Śritala. Size, 13⅝ and 13¾ × 2 inches. Foll. 45. Lines, 10 to 16 on a page Grantha. Injured.

Purchased in 1938–39 from Srī Cakravarti Jagannāthācāryar of Kumbakonam

R. No. **6616**

पादुकासहस्रव्याख्या by श्रीनिवासार्य ।

PADUKĀSAHASRAVYĀKHYĀ by Śrīnivāsārya of **Bhāradvājagotra.**

Foll. 1*a* to 36*a*. Lines 13, to 16 on a page. Extent, 2,000 **granthas.**

The other works herein are :—Divyasūricaritam, fol. 37. Kārikāvali, fol. 40*a*.

Contains Paddhatīs 1 to complete.

Same work as that described under D. No. 10577, but with the addition of the three stanzas in the beginning as given below :—

यस्याभवद्भक्तजनार्तिहन्तुः पितृत्वमन्येष्वविचार्य तूर्णम् ।
स्तम्भेऽवतारस्तमनन्यलक्ष्यं लक्ष्मीनृसिंहं शरणं प्रपद्ये ॥

श्रीशैलवेङ्कटेशार्यश्रीनिवासगुरून् भजे ।
येषां प्रसादादस्माकं सर्वसिद्धिरभूच्छुभा ॥

यत्रानन्त्यं प्रज्ञया वर्तिता वा शेषीभावो यत्र काष्ठां दधाति ।
निघ्नन्तां ते मह्यमन्योन्ययोगात्त्रैधन्तार्यौ रङ्गराट्पादुका च ॥

Fol. 36*b* is left blank.

R. No. **6617**

दिव्यसूरिचरितम् by गरुडवाहनपण्डितः ।

DIVYASŪRICARITAM by Garuḍavāhanapaṇḍita (alias Śrīnivāsakavi).

Foll. 37*a* to 39*b*. Lines, 10 on a page. Extent, 75 granthas.

Begins on fol. 37*a* of the Ms. described under R. No. 6616.

Same work as that described under D. No. 12150.

Begins with the 41st stanza of the first sarga and ends with the **9th stanza** of the second sarga.

R. No. **6618**

कारिकावली by विश्वनाथपञ्चाननः ।

KARIKĀVALI by Viśvanāthapañcānana.

Foll. 40 to 45*a*. **Lines, 10** to 14 **on a page. Extent,** 125 **granthas**

Begins on fol. 40*a* of the MS. described under R. No. 6616.

Same work as that described under D. No. 3928.

Breaks off in the course of Buddhinirūpaṇa in Guṇakhaṇḍa.

Foll. 40*b* and 45*b* are left blank.

R. No. 6619

Palm-leaf. 17¾ × 1⅜ inches. Foll. 55. Lines, 7 to 9 on a page. Grantha. Extent, 1,500 granthas. Injured. Printed.

Purchased in 1938-39 from Srī Cakravarti Jagannāthācāryār of Kumbakonam.

सिद्धान्तकौमुदीव्याख्या - तत्वबोधिनी by ज्ञानेन्द्रसरस्वती ।

SIDDHĀNTAKAUMUDĪVYĀKYĀ—TATTVABODHINĪ by Jñānendrasarasvatī.

Same work as that described under D. No. 1429.

Begins in the course of Anuditsūtra of Samjñāprakaraṇa and continues up to the completion of Svādisandhi.

R. No. 6620

Palm-leaf. Size, 15⅛ × 1¼ inches. Foll. 11. Lines, 5 and 6 on a page. Grantha. Extent, 200 granthas. Much injured.

Purchased in 1938-39 from Srī V. S. Desikacariar, Śirudāmūr, Tindivanam.

रामप्रपत्तिशतकम् ।

RĀMAPRAPATTIŚĀTAKAM.

Complete.

108 stanzas expressing the self surrender of the author to the Lord Rāma.

Beginning :

कल्याणाद्रिमहाधीरः कल्याणगुणवारिधिः ।
कल्याणरामः कृपया कल्याणानि करोतु नः ॥

राजराजशिरोरत्नराजनीराजिताङ्घ्रये ।
राजद्राजीवनेत्राय रामराजाय मङ्गलम् ॥

यः कोसलेन्द्रदुहितुस्सुकृतेन साक्षात्-
जातो हरिस्तनुभुवो दिवि वासवाद्यैः ।
अस्मान् जगच्च वितुतः परिपालयेति
तं राममार्तिहरणं शरणं भजामि ॥ १ ॥

End :

जातु स्मृते दुरितहारिणि यस्य नाम्नि
नश्यन्त्यघानि . . . . पराकृतानि ।
वाञ्छाधिकानि कुशलानि भवन्ति सद्यः
तं राममार्तिहरणं शरणं भजामि ॥ १०८ ॥

अष्टोत्तरैकशतपद्यसुपूरितेन
भक्त्या मु . . . . . रेण मयेड्यमानः ।
रामस्स एव जनकात्मजया समेतः
प्रीतस्सदापि हृदये मम सन्निधत्ताम् ॥

R. No. 6621

Palm leaf. 13¼ to 13¾ × 1½ inches. Foll. 57. Lines, 7 to 9 on a page. Grantha. and Telugu. Injured. Extent, 1,500 granthas.

Purchased in 1938-39 from Śrī Cakravarti Jagannāthācāryār of Kumbakonam.

तत्वचिन्तामणिदीधितिप्रकाशिका by गदाधर ।

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ by Gadādhara.

Same work as that described under D. No. 4046.

Contains Sāmānyanirukti only complete.

Foll. 49*a* to 57 contains a glass on the same.

R. No. 6622

Palm leaf. 16 to 16⅜ × 1¼ and 1¼ inches. Foll 531 Lines, 4 to 6 on a page. Grantha. Extent, 10,000 granthas. Slightly injured. Printed.

Purchased in 1938-39 from Śrī Ārāvamuda Iyengār of Kumbakonam.

स्मृतिमुक्ताफलम् by वैद्यनाथदीक्षित ।

SMṚTIMUKTAPHALAM by Vaidyanāthadiksita.

Same work as that described under D. No. 2794.

Contains Śrāddhakāṇḍa the 4th complete.

The Scribe adds :—

चित्रभानुसंवत्सरे कन्यामासे दक्षिणायने वर्षर्तौ सौम्यवासरे तृतीयातिथौ चित्रानक्षत्रे अमृतयोगे अस्मिन् शुभदिने लिखितः ।

R. No. 6623

Palm leaf. 17½ × 1¼ inches. Foll. 97. Lines, 7 and 8 on a page. Grantha. Extent, 2,500 granthas. Injured. Printed.

Purchased in 1938-39 from Śrī Cakravarti Jagannāthācāryār of Kumbakonam.

मल्लिकामारुतम् by उद्दण्डशास्त्री ।

MALLIKĀMĀRUTAM by Uddaṇḍa Śāstrī.

Same work as that described under D. No. 12580.

Complete.

(R. Nos. 6624 and 6625 one bundle.)

Palm leaf. 12¼ × 1⅝ inches. Foll. 26. Lines, 6 on a page Teluge. Good.

Purchased in 1938-39 from K. R. Swami Iyengār of Kumbakonam.

R. No. 6624

महाभारतम् by व्यास ।

MAHĀBHĀRTAM by Vyāsa.

Fol. 1a to 21b. Extent 500 granthas. Printed.

The other work here in is:—Bhāratānukramaṇikādhyāya Vyākhyā, fol. 22a.

Contains Anukramaṇikādhyāya the first in Ādiparva complete.

Same work as that described under D. No. 1015, but with addition of a stanza in the beginning as given below:—

अभ्रश्यामः पिङ्गजटाबद्धकलाप·
प्रांशुर्दण्डी कृष्णमृगत्वक्परिधानः ।
सर्वान् लोकान् पावयमानः कविमुख्यः
पाराशर्यः पर्वसु रूपं विवृणोतु ॥

R. No. 6625

भारतानुक्रमणिकाध्यायव्याख्या ।

BHĀRTĀNUKRAMAṆIKĀDHYĀYAVYĀKHYĀ.

Foll. 22a to 26b. Extent, 95 granthas.

Begins on fol. 22a of the MS described under the previous number.

A brief commentary on Anukramaṇikādhyāya of Ādiparva of Mahābhārata.

Complete.

Beginning :

ततो व्यासः तयैव सरस्वत्या जनबोधायाविष्टः । जयं जयसंज्ञकं भारताख्यमितिहासं . . . ।

"अष्टादशपुराणानि रामस्य चरितं तथा ।
कार्ष्ण्यो वेदः पञ्चमश्च यं महाभारतं विदुः ॥
जयेति नाम्ना त्वेतांस्तु प्रवदन्ति मनीषिणः ।

इति भविष्यत्पुराणवचनात् ।

End :

तव पुत्रा इवेति निधने दृष्टान्तः ।

त्यागो दानं (१२६) आस्तिक्यं गुरुवेदवाक्यादिषु फलावश्यंभावित्वनिश्चयः, सत्यं यथार्थभाषित्वं, दया परदुःखासहनेच्छा, आर्जवमकौटिल्यं (१२७) ।

Colophon :

। इति महाभारते आदिपर्वणि अनुक्रमणिकाध्यायव्याख्यायां प्रथमोऽध्यायः ।

R. No. 6626

Palm leaf. 17¾ × 1⅝ inches. Lines, 8 to 10 on a page. Grantha. Extent, 3,600 granthas. Much injured.

Purchased in 1938–39 from Srī Aravamudu Iyengar of Kumbakonam.

शास्त्रदीपिका by पार्थसारथिमिश्र ।

ŚASTRADĪPIKĀ by Pārthasāratimiśra.

Same work as that described under D. No. 4479.

Contains from the 7th Adhyaya almost to the end of the 8th Pāda of 10th Adhyāya.

R. No. 6627

Palm-leaf Size, 19¼ to 19⅝ × 1½ inches. Foll. 150. Lines, 7 and 8 on a page. Telugu. Extent, 8,500 granthas. Injured.

Purchased in 1938–39 from Srī T. Ramaswami Iyengar of Tirunageswaram, Tanjore.

कृष्णयजुर्वेदभाष्यसङ्ग्रहसारः by वेङ्कटेश ।

KṚṢṆAYAJURVEDABHĀṢYASAṄGRAHASĀRAḤ by Veṅkaṭeśa.

Begins in the course of 12th Anuvāka of 5th Praśna of 2nd Kāṇḍa and continues up to the end of the 7th Kāṇḍa. In the middle 35 leaves, viz., foll. 254 to 288, which consists of the portion from 22nd Anuvāka of 7th Praśna of 5th Kāṇḍa to the 10th Anuvāka of the 6th Praśna of the 6th Kāṇḍa are wanting.

Same work as that described under D. No. 15714.

For the previous portion please see the Ms. described under R. No. 6591.

Colophon :

इति नैध्रुववेङ्कटेशविरचिते यजुर्वेदभाष्यसङ्ग्रहसारे सप्तमे काण्डे पञ्चमे प्रपाठके पञ्चविंशोऽनुवाकः । समाप्तश्च प्रपाठकः, काण्डश्च, संहिता च ।

चतुर्वेदश्रीनिवासगुरुणा कृपया वयम् ।
संहिताभाष्यसारार्थं समगृह्णीम विस्तृतम् ॥

R. No. 6528

Palm leaf. 15¼ × 1¾ inches. Foll. 44. Lines, 11 on a page. Grantha and Tamil. Extent. 1,500 granthas. Good.

Purchased in 1938–39 from Śrī Uppali Iyengar of Kumbakonam.

सिद्धोपायसुदर्शनम् by श्रीनिवासदास ।

SIDDHOPĀYASUDARŚANAM by Śrīnivāsadāsa.

Complete.

Explains the means to correct knowledge, the "Categories" and the nature of the individual and finite souls, according to the *Viśiṣṭādvaita* school of the Vedānta.

Beginning :

मुमुक्षुज्ञातव्ये तत्वयाथात्म्ये मूलमन्त्र एव प्रबलं प्रमाणम् । तदितरेषां तन्मूलत्वेन दौर्बल्यात् । गम्यते चानयोर्मूलमूलिभावः । मूलमन्त्रस्सनातनः, सर्वमष्टाक्षरान्तस्थमित्यादिषु नचैतेषामसदर्थवादत्वं सर्ववाङ्मूलभूतप्रणवादिघटितस्यास्य सर्वशास्त्रमूलत्वाद्यनपायात् ।

Colophon :

इति श्रीमद्वाधूलकुलतिलकश्रीमन्महाचार्यचरणयुगळभावितेन श्रीनिवासदासेन विरचिते सिद्धोपायसुदर्शने प्रमाणयाथात्म्यविभागः प्रथमः ।

अथैवं स कलशास्त्रमूलभूतया प्रबलप्रमाणत्वेन धर्मज्ञसमयसिद्धे अष्टाक्षरप्रथमपदप्रथमाक्षरेण सर्ववेदबीजभूतप्रणवप्रकृतिभूतेनाकारेण परमात्मस्वरूपं परस्वरूपयाथात्म्यं भगवच्छरीरत्वरूपं स्वस्वरूपयाथात्म्यं च प्रतिपाद्यते ।

End :

अनुगृहीतं च लोकाचार्यैरपि स्वरूपविरोधि பழிக்கயாவது யானே, நீ யென்னுடைமையும நீயே யென்றிருக்கை யிறே. तस्माद्यथासंप्रदायप्रमाणोपपत्तिजीवस्वस्वरूपमपि भगवदनन्यार्हशेषत्वैकनिरूपणीयमेवेति सिद्धमित्यलमतिरहस्यार्थप्रपञ्चनेनेति विरम्यते ।

Colophon :

इति श्रीमद्वाधूलकुलतिलकश्रीमन्महाचार्यचरणयुगळभावितेन श्रीनिवासदासेन विरचिते सिद्धोपायसुदर्शने स्वस्वरूपनिरूपणदर्शनाविभागः तृतीयः ।

(6629—6629*b* one bundle.)

R. No. 6629

Palm leaf. 13¾ - 14¾ × 1¾ inches. Foll. 68. Lines, 7 and 8 on a page. Nandinagari. Injured.

Purchased in 1938-39 from Sri V. S. Desikacaryar of Sirudamur, Tindivanam.

मदालसाकुवलयाश्वम् by कृष्णकवि

MADĀLASĀKUVALAYĀŚVAM by Kṛṣṇakavi.

Foll. 1 to 61 . Extent, 2,000 granthas.

The other works here in are:—Kṛṣṇastuti, fol. 62*a*, Ramacandrastuti, fol. 67*a*

Complete in five acts.

Fol. 61 contains a duplicate copy of the first leaf of this work

A Nāṭikā in five acts representing the story of Madālasā with Kuvalayāśva, son of Śatrujit by Kavībhasimha Kṛṣṇakavi, the second of the three sons of Dāsārya of Hārīta family by Veṅkamāmbā of Jamadagni family. The author was a disciple of Sūryanārāyaṇa and Nāḍānvaya Rāmārya of Madhugiri, the later being very famous that time, and he was under the patronage of Kṛṣṇabhūpāla of Liṅgarāṭ family whow as ruling over the Mysore and in whose court Nṛsimhācārya, the maternal uncle of the author was a court pandit along with his nephew. Kṛṣṇakavi has written among others a commentary on Kṛṣṇaprabhāvodayam of Śrīnivāssārvabhauma. This work is also mentioned as Mañju Madālaṣā and Madālasāsucarita in the Colophon. This Drama was intended to be staged on the occasion of the Dasara festival.

Beginning :

या सानन्दमवाप्तगोत्रजनना हित्वा कलङ्कान्वितां
दक्षोत्पत्तिमयोनिजा विजयते विश्वस्य माता स्वयम् ।
एकीभूय मुदा तया धनपतेरावासमध्यासितः
श्रीमानस्तु महीधरेन्द्रजनुषाऽस्माकं श्रियै शङ्करः ॥

अपिच ।

वीटीभोगोपतन्द्राभ्यामङ्गुलिभ्यां श्रियः पतेः ।
श्रीभूस्तनद्वयी पायात् खिन्नोत्सेधात् जगन्मुहुः ॥

नान्द्यन्ते सूत्रधारः (सर्वतोऽवलोक्य सानन्दम्)

वीणा रागानुगगुणगणा भावनीतं हि गीतं
तत्तत्कालोत्थाभिनयलयग्रामसाङ्गो मृदङ्गः ।
कालश्चायं शरदविकलश्चन्द्रिकानन्दसान्द्रा
रात्रिः पात्रीभवति हृदयं चित्रसद्राज्यलक्ष्म्याः ॥

पुरतः सज्जीकृतमिव रङ्गमङ्गलम् । अपि नामाचिरप्रवर्तितनाट्यसम्भारा प्रिया मे नटी ।

सूत्रधारः—

आर्ये । प्रशस्तैषा राजवल्लभस्य परिषत् शारदनवरात्र्युत्सवसमलङ्कृतरौक्मसिंहपीठाधिष्ठितराजसार्वभौमसमादिष्टा नाट्याचार्याणां मय्येव पूर्णानुग्रहवति एवमाज्ञापयामास ।

सू—(सप्रकाशम्)

दिगङ्गनाजघनदुकूलसन्ततिर्जगत्त्रयीपूर्णवियत्तरङ्गिणी ।
अभेदकारिण्यथ विष्णुशर्वयोरियाद्य कीर्तिरस किलैष कृष्णराट् ॥

न—(छा) आर्य ज्ञातं महीशूरपुराधीश इति ।

नटी—को उण परिस्सदादेसो ?

(छाया) कः पुनः परिषदादेशः ।

सू—(सोपहासगूढम्)

अयमेव परिषदादेशः । यथा - भो भो
रसज्ञतिलकनाट्याचार्य ।
यद्ग्राह्यकारिणी नाम यच्च भूमण्डलस्य वा ।
तन्नामराज्ञोराजन्यवर्यचारित्रचित्रितम् ॥
तन्नाटकं निरूप्यताम् ।

* * * * *

सू—प्रिये ! अस्ति हि मदालसाकुवलयाश्वं नाम नाटिका ।

एतदेव गुरोर्नश्च मृदुरूपकमुत्तमम् ।
कृष्णग्रथितवस्त्वेतत् दर्शयाभिनयेन वै ॥

* * * * *

नटी—(छा) किंनु खलु कालिदासभवभूतिप्रभृतिभिर्विरचितं नाटकं हित्वा आधुनिककृष्णकविविरचिते परिषदभिमाने निमित्तम् ।

सू—नूतनो वा पुराणो वा कविरस्तु कृतिस्तथा ।
आद्रियन्तेऽत्र रसिकाः सुमे रसमिवालयः ॥

न—(छा) तस्मिन् आर्यः प्रमाणम् । कः पुनः स कृष्णकविः ?

सू—मधुगिरिबुधवरतिलकश्रीरामार्यस्य मुख्यशिष्योऽसौ ।
हारितान्वयवारिधिविधुः कृती दासधीमतस्तनयः ॥

नटी—(छाया) महात्मा खलु रामार्यगुरुः ।

सू—प्रिये ! किं वक्तव्यं रामार्यमाहात्म्यम् ।
श्रीनाढान्वयदुग्धसिन्धुशशभृद्विद्यौघमुक्तार्णवः
साहित्यामृतचन्द्रकान्तकलशो व्यङ्ग्यार्थकल्पद्रुमः ।
रामार्यः खलु यत्प्रसादमयसद्रा • • • •
कृतौ ॥

न—कहं पुणा दासधीमदो
(छा) कथं पुनर्दासधीमान् ?

सू—कदम्बपुरपण्डितप्रबलहारहीरोत्तम
शिला ' ' • • • • • • • मान्

न—(छा) अद्य कथमिव ।

सू—किं भणामि ।

यो मन्थाचलवत समुह्य सुदृढ ता ' ' • ' मृ शासनं
सम्मथ्य प्रभुचित्तवारिधिमहो धीहस्तशेषाहितः ।
जाते गङ्गसमुद्रसौधकलशे प्राप्तेषु दैत्येष्विवा-
सक्तज्ञातिषु शौरिवत्सुतसुरान् पुष्णातुमन्तंदध !'

न- छा) तस्य धर्मदाराः कवेर्माताच कथमिव ?

सू—पूर्वं सा किल
त्रीन् वेङ्कमाम्बा सुषुवे त्रेताग्नीनिव यज्ञभूः ।
शिवां सम्पूज्य जननी भद्रयाद्य विराजते

न—(छा) तौ पुनः कीदृशौ यावस्य कवेर्ज्येष्ठकनिष्ठौ

सू—यस्याग्रजोऽप्यग्र्य गुणो विष्णोरिन्द्र इवामलः ।
कनीयान् रामनामापि भक्तिवाल्लभ्यलक्ष्मणः ॥

न—(छा) एतादृकपुत्ररत्नशालिनोरार्यदम्पत्योः कीदृशी धन्यता!

स—(सगौरवम्)
मित्रामित्रसमत्राता दासार्योऽसौ महेश्वरः ।
वेङ्कमाम्बाद्वितीयोऽगादर्धनारीशितुः श्रियम् ॥

सू—मातामहा जामदग्न्याः कलाकल्यनिषद्यकाः ।
नृसिंहार्यो मातुलोऽपि तादृकूलक्ष्मनृसिंह्म सन् (?) ॥

न—(छा) आर्य ! एष एव किल कुमारसदृशस्यापि कुमारजातस्य कुमारप्रथितस्य तस्य महात्मनः प्रियमित्रम् ।

सू—यावियौ ।

लिङ्गराजप्रभोर्नैकगुणरत्नकुलस्य तु ।
कृष्णराट्कीर्तिमुक्तौघहारालीगुम्फकौ जगुः (?)

किञ्च,

एष कविरेव किल
कृष्णप्रभावोदयादिकाव्यसद्रत्नसन्ततेः ।
व्याख्याता श्रीनिवासाख्यसार्वभौमकृतश्रियः ॥

न—(छा) जाने उद्दाम एव स कविः ।
तथापि कुत एतस्य प्रबन्धः एतावन्तं कालं न श्रुतिं गतः ।

सू—आर्ये ! अवधार्यतामेतत् ॥

विद्वत्सु निर्व्यसनिता तटिति स्थिरता खले जने समता ।
सम्पूर्णता सदेन्दौ स्त्रीषु प्रियता न जातु दृष्टचरा ॥
नास्मिन् कृष्णरायभूपालकटाक्षाः प्रसृताः ।

(त्रिगतम्)

Colophon :

यत्कीर्तिप्रततिर्जगत्त्रयतता भारालसत्कोरका
धत्ते सा प्रतिमा प्रफुल्लकुसुमं सम्पूर्णचन्द्रच्छलात् ।
तस्य श्रीवरकृष्णभूपतिमणेस्सभ्याज्ञया नाटके
श्रीकृष्णप्रथिते जयत्यनुकलं मादालसेऽङ्कोऽग्रिमः ॥

Colophon :

। इति प्रथमोऽङ्कः ।

Colophon :

। इति द्वितीयोऽङ्कः ।

यद्दानोदकबिन्दवो दिवि सदा दीव्यन्ति तारामिषात्
देवानां प्रतिवासरार्पितमहानैवेद्यसारो विधुः ।

तस्य श्रीविभुकृष्णभूपतिमहासभ्याज्ञयासौ कविः
कृष्णो मञ्जुमदालसासुचरिते द्वितीयकाङ्कं जगौ ॥
श्रीसूर्यनारायणतो हि शेषात्सद्देशिकेन्द्रात्समवाप्तशाब्दः ।
रामाभिधानामृतनित्यसेवी कृष्णो जयत्यद्य कवीभसिंहः ॥

End :

गा (लवः) राजन् इतः किमन्यदुपकरोमि ।

रा --अघटनघटनाघटिता सकलमहाराज्यसम्पदा च वधूः ।
सर्वं तद्धि समृद्धं यशो विशालं समाश्रितं विमलम् ॥

कुवलयाश्वाशासर्वं श्रीमतः प्रसादेनोपपन्नम् ।

गा—

तथापि इदमस्तु भरतवाक्यम् ।

वृष्ट्यां पूर्णा वहुलजलदा कालकालेऽपि भूमिः
भूम्यां सस्यान्यथ फलतरैस्तानि तैर्वित्तसङ्घाः ।
भूयासु स्तैर्वितरणगुणौघैश्च विद्वद्वरिष्ठाः
सौख्या वाणी ध्वनिरसगुणालङ्कृताङ्ग्या तया श्रीः ॥

मदालसापुण्यमनोज्ञनामकं शुभालयं कृष्णकृतीन्द्रक्लृप्तम् ।
. . . . . श्रीदक्षिणामूर्तिमुदेस्यात ॥

दासार्यमाङ्गल्यतपोविशेषात्
श्री वेङ्कमाम्बाश्रितपुण्यपुञ्जात् ।
रामार्य . . . .
. . . . खिल ॥

। इति यथायथं परिक्रम्य निष्क्रान्ताः सर्वे ।

Colophon :

। इति पञ्चमोऽङ्कः । समाप्तमिदं मदालसाकुवलयाश्वं नाटकम् ।

R. No. 6629 (a)

कृष्णस्तुतिः ।

KṚṢṆASTUTIḤ.

Foll. 62*a* to 66*b*. Extent, 150 granthas.

Begins on fol. 62*a* of the Ms. described under R. No. 6629.

Complete.

An enlogy of Lord Kṛṣṇa. It seems that the author was Kṛṣṇakavi who wrote Madālasākuvalayāśvam.

Beginning :

इह खलु सकलमुनिजनागण्यपुण्यपुञ्जमञ्जरीविलासपराशरमैनिवरतपस्सम्पदभिवृद्धिरूप निखिलप्रज्ञाधिदेवतायितकृष्णद्वैपायनसकलपुराणप्रणयनपरिशीलनदक्षतापरिहृतसंशय सर्वपूर्णसत्यनित्यसच्चिदानन्दैकसमाधिविकलपरिदूनमानसानन्दननारदोपगीत सर्वभूत कृष्ण सूत सारासारविचारगुणगणनप्रवणतापरितोषपोषासादितारब्धसम्पादितानन्दसान्द्रतादात्म्यपर्युपासनोपदेशतुष्टपुष्टाशिष्टावशिष्टस्पष्टात्मशक्रसुखगीतवर्तिदोष स्फीतवेदान्तव्रातकलितनिजकृतादात्म्यशान्तस्वान्तधूतशृङ्गिमहर्षिशाप भो । तनक्षकविपक्षभक्षणभगक्षणाक्षपृच्छास्वच्छकथावसरश्रुतसगुणमूर्तिस्थूलदेहभूत सृष्टिलयविशेषकपिलदेवभूतीसंवादरूपजगदण्डकरण्डमिथ्यात्वचिद्वसुसत्यताविशेषानन्दकन्दसान्द्रोपरिचरचर्यादक्षदुहितृवर्यचर्यावर्गशौर्यशुभसपर्याविलासपुरञ्जनार्यभूखगोलादन्त वृत्रशत्रुनिधन हिरण्यकशिपुदलन तत्पुत्रमित्रचित्रचरित्रमनुसमूहविचित्रोदन्त क्षीरजलधिमथन गजमहाग्राह प्रथनशमन दनुजदमन सूर्यचन्द्रवंशकथनतुष्टशिष्टदेवरातपृष्टशुकाद्घुष्ट —

End :

प्रकाशसत्यज्ञानन्दबोधभावनानन्दायितदासार्यरामार्यभावनाबोध निजात्मैकप्रकाशं प्रकाशचिदानन्दचिद्घनभावनयाचिदानन्दायितवेङ्कट देवगुरुस्वरूपं

तेजोवैभवोपासक कृष्णनामा(दं) नं आनन्दं सत्यं शातमन्द्वितीयं, निराकारं, निर्गुणं, निर्लेपं नित्यं बुद्धं शुद्धं नित्यरमासनाथं रुक्मिणीनाथं श्रीकृष्णमनाथना[मा]द्यं भगवन्तं नित्यमहं नतोऽस्मि ।

R. No. **6629** (*b*)

रामचन्द्रस्तुतिः ।

RĀMACANDRASTUTIḤ.

Foll. 67 and 68. Extent, 50 granthas.

Begins on fol. 67*a* of the MS. described under R. No. 6629.

Complete.

A eulogy on Sri Rāmacandra in prose.

Beginning :

इह खलु फणिगणचक्रवर्तिफणाफलकमणिगणपम्फुल्यमानफुल्लका-न्तिकुसुमलसत्फलायितमहाराजगृहफलफलितकनकप्राकारलतासमावृते ।

* * * * *

साकेता . . . . . विलसन्मणिमं . . . . . राजमानभर्म्य-हर्म्यपरिकर्मितमहानिकविधजनवरालङ्कृतसभान . . . तरत्नसिंहासन-मध्यासीनं ।

End :

रामा . . . श्रीशालिनं मालिनं पालिनं भावये श्रीवितन्द्रं स्मितार्द्रं भुवीन्द्रं श्रितमहेन्द्रं हृतदनुजेन्द्रं श्रितभक्तेन्द्रं युतमौनीन्द्रं . . . . . . सन्ततं श्रीरामचन्द्रं मन्मनोमन्दिरेन्द्रम् ।

R. No. **6630**

Palm-leaf. 14⅜ and 14⅝ × 1⅜ and 1½ inches. Foll. 19. Lines, 8 on a page. Telugu. Extent, 600 granthas. Fair.

Purchased in 1938–39 from Śrī Uppili Iyangar of Kumbakonam.

परिभाषाव्याख्यानम् ।

PARIBHĀṢĀVYĀKHYĀNAM

A commentary on paribhāṣas used in Vyākaraṇa of Sanskrit grammar. The name of the author is not known.

Complete.

Beginning :

व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणम् । व्याख्यानतो विशेषार्थज्ञानं, सन्देहे सति . . . क्रम । ननु सन्देहादुभयतोऽर्थाप्रतिपादकं शास्त्रं स्यात् । तच्च व्याख्यानं षड्विधम् । यथाहुः

पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना ।
आक्षेपोऽथ समाधानं व्याख्यानं षड्विधं मतम् ॥

इति ।

अथोदाहरणम् । 'ङेराम्नद्याम्नीभ्यः' अत्र सप्तम्येकवचनस्यैव ङेर्ग्रहणम्,' न तु चतुर्थ्येकवचनस्य । तथा 'आत्मन्विश्वजनभोगोत्तरपदात् ख' इति विश्वजन इति षष्ठीतत्पुरुषः, बहुव्रीहिः, कर्मधारयो वेति सन्देहे कर्मधारय एवेति सिद्धान्तः ।

End :

यत्तु मथुरानाथभट्टाचार्या वदन्ति 'पाणिनिवचनम्' इति तदतिरभसादिति ध्येयम् । अत एव वार्तिककारवचनमिति वदन्तो मीमांसका अपि प्रत्युक्ताः । केचित्तु व्याख्यानतो विशेषप्रतिपत्तिरित्यादिसर्वाः परिभाषाः व्याडिमुनिना विरचिता इत्याहुः । वस्तुतस्तु नाचार्याणामिमानि वचनानि । पूर्वोदाहृतलण्सूत्रादिगत (ता) कारागुपादानज्ञापकेभ्य इष्टसिद्धये केवलं पाणिन्यादिमुनित्रयेण उररीक्रियन्ते । अतएवानिष्टप्रसक्तौ नैषामभ्युपगम इति ज्ञापकसिद्धं न सर्वत्रेति परिभाषायाः न्यायसिद्धानुवादकत्वमिति न परिभाषावशादनिष्टापादनं साम्प्रतमिति सकलेष्टसिद्धिः ।

Colophon :

। इति परिभाषाव्याख्यानं संपूर्णम् ।

R. No. 6631

(R. Nos. 6631 and 6631(*a*) one bundle)

Palm-leaf. $15\frac{1}{8} \times 1\frac{3}{8}$ and $1\frac{7}{8}$ inches. Foll. 25. Lines, 10 to 12 on a page. Grantha. Good.

Purchased in 1938–39 from Srī Uppili Ayyangar of Kumbakonam.

सिद्धान्तपरिभाषानिरुक्तिः ।

SIDDHĀNTAPARIBHĀṢĀNIRUKTIḤ.

Foll. 1 to 22*b*. Extent 750 granthas.

The other work herein is :—Siddhānthparibhāṣā, fol. 23*a*.

Incomplete.

This is a commentary on Siddhāntaparibhāṣā of Śrīnivāsadāsa. The name of the author is not known.

Beginning :

आनम्यास्मद्गुरून्सर्वानालोच्यात्यर्थगूढताम् ।
सिद्धान्तपरिभाषाया निरुक्तिं करवाण्यहम् ॥

तत्र तावत् श्रीभगवद्रामानुजपदकमलपादुकाभावतात्रिदण्डताभागिनेयताद्यप्रतिममहामहिमशालिदाशरथिगुरुदिव्यावतारपरिग्रहपावित्रितवाधूलवाय-वंशवरदुग्धसागरसुधाकिरणकौस्तुभायितस्वामिमहागुरुचरणनिर्हेतुकविशेषकटाक्षसन्धुक्षितात्मसत्तः तत्प्रसादविशेषसमुज्जृंभितनिगमान्तद्वयहृदयवैशद्यः श्रीनिवासदासाख्यः संयमी स्वज्ञानवैशद्यं स्वीयानां चोपकर्तुं सिद्धान्तपरिभाषाख्यं प्रबन्धमारभमाणः तस्य साम्प्रदायिकत्ववक्तृवैलक्षण्यादिज्ञापनाद्यर्थं स्वयं प्रयोजनतया सदानुष्ठीयमानं स्वाचार्यप्रपदनमेव प्रथमं ग्रन्थतो निबध्नाति । श्रीवाधूलेत्यादिना ।

End :

हितानुशासनपरेष्वागमेष्वखिलेष्वपि ।
व्यवसायात्मिका बुद्धिरेकैवाचार्यसेविनाम् ॥

अखिलाम्नायभावानां गूढानामेकगोचरम् ।
जीवात्मपरवैशिष्ट्यं त्रयीसारेषु दर्शितम् ॥

प्राहुः साधनतः सारं ततस्तस्य तथात्वकृत् ।
त्रयीसारतमत्व तत् तारार्थस्योपपद्यते ॥

वेदानामेकशास्त्रत्वं सक्तानां हितशासने ।
अर्थैकत्वात्सदा चा(रोगी)ताचार्येण चादृतम् ॥

य एवमर्थतत्त्वज्ञः स्थिरधीर्व्यवसायवान् ।
परदारस्यैकसक्तः स्यात्सर्ववेदी स उच्यते ॥ ६२ ॥

R. No. 6631 (*a*)

सिद्धान्तपरिभाषा by श्रीनिवासदास ।

SIDDHĀNTAPARIBHĀṢĀ by Śrīnivāsadāsa.

Foll. 23*a* to 25*b*. Extent, 100 granthas.

Begins on fol. 23*a* of the Ms. described under R. No. 6631.

On the accepted conclusions of the Viśiṣṭādvaita Vedānta.

Complete.

Beginning :

श्रीवाधूलमहाचार्यचरणद्वयभावितः ।
तावेव शरणं यामि सर्वथात्र परत्र च ॥
सतां तत्वबुभुत्सूनां तत्वयाथात्म्यसिद्धये ।
सिद्धान्तपरिभाषेयं सङ्ग्रहेण विलिख्यते ॥
धर्मज्ञसमये वेदाः कार्याकार्यव्यवस्थितौ ।
प्रमाणमेकशास्त्रश्चेत्याचार्यै रति . . . . ॥
ते विभिन्ना दुरन्ताश्च नानार्थाक्षरस . . . ।
असर्वज्ञस्य दुर्ज्ञेयास्तद्भावज्ञानमन्तरा ॥

End :

उपात्तं महनीयैश्च व्यर्थं स्यादप्यसत्समम् ।
अनैवरूपताज्ञानं प्राप्यादीनां हि यद्भवेत् ॥
तत्सर्वं तद्विरोधीति द्रष्टव्यं सूक्ष्मदृष्टिभिः ।
परतत्वबन्धयाथात्म्यज्ञानिनो हि विपश्चितः ।
जित्वा विरोधिनस्सर्वान्भवेयुर्वल्लभा विभोः ॥

Colophon :

। इति श्रीमद्वाधूलकुलतिलकश्रीमन्महाचार्यचरणयुगभावितेन श्रीनिवासदासेन विरचिता सिद्धान्तपरिभाषा समाप्ता ।

R. No. 6632

Palm leaf. 16¼ × 1¼ and 1⅜ inches. Foll. 48. Lines, 6 to 8 on a page. Grantha. Extent, 1,500 granthas. Slightly injured.

Purchased in 1938–39 from Śrī Cakravarti Jagannāthācārjār of Kumbakonam.

पूर्वपक्षावलिः ।

PŪRVAPAKṢĀVALIḤ.

Similar to the work described under R. No. 7071 (*a*).

Incomplete.

Beginning :

उत्तरपदत्वे चापदादिविधौ प्रतिषेधः । उत्तरस्य पदमित्येवं षष्ठी-तत्पुरुषः । उत्तरशब्दः उत्तरपदपर्यायः, भीमभीमसेनइतिवत् ।

च स्वृत्या समासचरमावयवार्थकः । एवञ्च समासचरमावयवस्य पदत्वे कर्तव्ये लुमता लुप्ते प्रत्ययलक्षणं नेत्यर्थः । अपदादिविधाविति प्रसज्यप्रतिषेधो न तु पर्युदासः । पदत्वस्य पदादिविधिभिन्नत्वादपदादिविधावित्यस्याव्यावर्तकतापत्तेः । विधिरिति कर्माणि क्तिः । पदादेः कार्ये कर्तव्ये प्रत्ययलक्षणप्रतिषेधो नेत्यर्थः । परमवाचावित्यादौ वाक्‌च्छब्दस्यान्तर्वर्तिनीं विभक्तिमाश्रित्य सुपन्तत्वेन पदसंज्ञायां प्राप्तायां उत्तरस्य चरमावयवरूपवाक्छब्दस्य पदत्वे कर्तव्ये प्रत्ययलक्षणस्यानेन निषेधात् चकारस्य पदान्तत्वाभावेन चोःकुरिति कुत्वाभावसिद्धिः ।

End :

न च दृष्टान्ते उपमेयभूतगुरुसम्बन्ध्युच्छिष्टभोजननिवृत्तिव . . . . . . वद्दार्ष्टान्तिकेऽपि उपमेयभूतादेशसम्बन्ध्यलप्रयोज्यकार्यस्यैव निषेधः स्यादिति रामायेत्यादौ दोष इति वाच्यम् । दृष्टान्ते उपमानभूतदेवदत्ता[दि]निष्ठगुरुत्वादिप्रयोज्यस्यैव उच्छिष्टभोजनस्य निषेधत् अत्राप्युपमानभूतस्थानिनिष्ठाल्वृत्तिधर्मातिदेशप्रतियोज्यकार्यस्यैव निषेधात् दृष्टान्ते गुरुपुत्रनिष्ठ . . . नतिदिष्टगुरुत्वप्रयोज्योच्छिष्टभोजनस्यैव उपमेयभूतादेशगतानातिदिष्टाल्वृत्तिधर्मस्याप्यनिवृत्या दोषात् । न चाल्विधावित्यत्र सप्तम्याः प्रयोजकत्वार्थकतयाल्वृत्ति . . . . माज्यप्रयोज्यकार्यप्रयोजकस्य स्थानिनिष्ठादेशातिदेशो नेति निषिध्यते न तु स्थानिभूतो योऽल् स्थानिसम्बन्धी वा योऽल् तत्प्रयोज्यकार्यइति अलइ . . . . त्वस्य शब्दतोऽलाभात् ।

(R. Nos. 6633 and 6633 *a* one bundle.)

Palm leaf. 15⅜ × 1¼ inches. Foll. 9. Lines, 9 and 10 on a page. Grantha. Good.

Purchased in 1938–39 from Śrī Jagannāthācāryār of Kumbakonam.

R. No. 6633

ब्राह्मण्यादिजातिवादः ।

BRĀHMAṆYĀDIJĀTIVĀDAḤ.

Foll. 1 and 2. Lines 10, on a page. Extent, 60 granthas.

The other work herein is : Vedāntaviṣaya, fol. 3a.

Similar to the work described under R. No. 6590.

Incomplete.

Beginning :

आम्नायस्य क्रियार्थत्वादित्याद्यर्थवादाधिकरणगुणसूत्रम् । शास्त्रदृष्टविरोधात्—इदमधिकरणपूर्वपक्षसूत्रम् । अत्र उदाहरणान्तराणां दृष्टविरोधमुपपाद्य कौस्तुभे इदमपि पूर्वपक्षहेतुतयोक्तम् । न चैतद्विद्मो ब्राह्मणाः स्मो वयमब्राह्मणा वेति अत्र दृष्टविरोधात् । ननु नायं दृष्टविरोधः । "सर्ववर्णेषु सवर्णासु जायन्ते हि सजातयः" इत्यादिशासन(?)त्वात् ब्राह्मणत्वादीनां ब्राह्मणमातापितृसम्बन्धस्य ब्राह्मणजात्यभिव्यञ्जकस्यापि ब्राह्मणोऽयमित्यननुभवाच्च ।

End :

मोक्षधर्मे भृगुभरद्वाजसंवादे वर्णस्वरूपकथनम् । तत्रैव शुकानुप्रश्ने कार्तयुगधर्मः । तत्रैव तं देवा ब्राह्मणं विदुरिति वचनानि । आरण्यके लोमशतीर्थयात्रैव मार्कण्डेयसमास्यापर्वणि जात्युद्धारः । एतत्सर्वं जातिविचारोपयोगितया विचारणीयम् ।

R. No. 6633 (a)

वेदान्तविषयः ।

VEDĀNTAVIṢAYAḤ.

Foll. 3 to 9. Lines, 9 and 10 on a page. Extent, 250 granthas.

Begins on fol. 3a of the Ms. described under R. No. 6633.

A treatise on Prāṇādhikaraṇa according to the Viśiṣṭādvaita Vedānta.

Beginning :

प्राणशब्दार्थतायाः मुख्यप्राणसम्बन्धनिबन्धनत्वात्तस्यापि तथात्वस्य भगवत्सम्बन्धनिबन्धनत्वाच्च भगवद्व्यतिरिक्तस्य प्राणशब्दमुख्यार्थत्वाभावादत्र प्राणशब्दो भगवदेकविषय इति दर्शयितुं भगवद्व्यतिरिक्तस्य प्राणशब्दप्रवृत्तिनिमित्तविरहे प्रमाणं दर्शयति – को ह्येवान्यात् कः प्राण्यादित्यादीति ।

End :

मधुविद्याफलस्य तु वसूनामेवैकात्वे साति सांसारिकत्वश्रवणात् मुक्त्यन्तर्भावासंभवः । नहि तद्वदत्र विशिष्य फलं श्रूयते ।

R. No. **6634**

Palm leaf. 18¼ × 1¾ inches. Foll. 50. Lines, 8 on a page. Grantha. Extent, 1,500 granthas. Injured. Printed.

Purchased in 1938–39 from Srī Chakravarti Jagannathācāriār of Kumbakonam.

तत्वचिन्तामणिदीधितिप्रकाशिका by गदाधर ।

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ by Gadādhara.

Same work as that described under D. No. 4055.

Contains Hetvābhāsasāmānyanirukti.

Complete.

Foll. 1*a* to 4*b* contain a gloss for some sentences in the first and second Lakṣanas.

Fol. 5 consists of Cintāmanīsāmānyanirukti.

Foll. 6 to 8 contain Dīdhitisāmānyanirukti.

(R. Nos. **6635** to **6635** (*e*) one bundle.)

R. No. **6635**

Palm leaf. 14 and 14⅛ × 1¼ inches. Foll. 118. Lines, 7 to 10 on a page. Grantha. Slightly injured.

Purchased in 1938–39 from Srī V. S. Desikacarya of Śirudamur, Tindivanam.

सर्वमतोपन्याससिद्धान्तदीपिका by सर्वात्मशम्भु ।

SARVAMATOPANYĀSASIDDHĀNTADĪPIKĀ by Sarvātmaśabmhu.

Foll. 1 to 1*a*. Lines, 8 on a page. Extent, 325 granthas.

The other works herein are: Śaivasiddhāntadīpikā, fol. 17*b*, Rāma nāthasiddhāntādīpikā, fol. 35*a*, Maddhyārjunasiddhāntadīpikā, fol. 60*a*, Siddhāntasamuccaya, fol. 84*a*, Siddhāntarahasyasāra, fol. 112*a*.

Complete.

A summary of the accepted tenets of the various philosophical systems of thought by Sarvatmaśambhu, a disciple of Aghorācārya.

Beginning :

सर्वेषं समयस्थानां मुक्तिमार्दौ विवक्षुणा ।
वेदविज्ञानसम्पन्नगुरुणा शिववादिनाम् ॥

चार्वाकाणां मतं तावदग्रे संगृह्यतेऽधुना ।
यद्यद्बुध्याद्यनुगो यस्य बृध्यादिस्तत्तदात्मकम् (?) ॥
अभेर्यथोष्णज्ञानं च देहवृद्धिक्षयानुगम् ।
ततस्तदात्मकत्वात्किं त्वयात्मत्वेन साध्यते ॥

End :

अथात्मा विमलो बद्धः पुनर्मुक्तश्च दीक्षया ।
स देशिकमनुप्राप्य दीक्षाविछिन्नबन्धनः ॥
कृतमपि फलाय न स्यात् दीक्षान्तरमूषरोप्तबीजमिव ।
बलवद्विशेषयेस्त्र छतिकरजातं विहाय कर्मैकम् (?) ॥
द्विविधद्विरूपात्रपि प्रत्येकमुपजायते ।
श्रिता[वा]कृ यावती तत्र कुण्डमण्डलपूर्विका ॥
मनोव्यापारमात्रेण बद्धा (सा) ज्ञानवती मता ॥
इति सर्वमतस्थानामुक्ता सिद्धान्तमादितः ।
पश्चादघोरशिष्येण सर्वात्मशम्भुना मया ॥
शैवानां समयस्थानां शैवसिद्धान्तदीपिका ।
मया शिवपदस्थेन (चित्तन)[मनसा] सम्यगीरिता ॥

R. No. 6635 (*a*)

शैवसिद्धान्तदीपिका by सर्वात्मशम्भु ।

ŚAIVASIDDHĀNTADĪPIKĀ by Sarvātmaśambhu.

Foll. 17*b* to 34*a*. Lines, 7 and 8 on a page. Extent, 350 granthas.

Begins on fol. 17*b* of the MS. described under R. No. 6635.

Complete.

An expository work on the various doctrines in Śaivasiddhānta and the means for salvation by Sarvātmaśambhu.

Beginning :

अवर्णविग्रहं देवं वर्णविग्रहवर्जितम् ।
वर्णविग्रहवक्तारं नमामि स्तौमि संश्रये ॥
चराचरात्मकं विश्वमोतप्रोतं च सर्वतः ।
पशुपाशभिदा येन नमस्तस्मै पुरद्विषे ॥

इह तावत् जातिकुलाद्यभिमानास्पदमिमं स्थूलदेहं पृथिव्यप्तेजो वाय्वाकाशानां समवायम् । तत्र प्राक्तनपुण्यपापानुकूलं ब्राह्मणादि-वर्णाश्च रूपश्रियौ । इन्द्रियपाटवमपि विभूनो नियुतानायुषो नियतभोगांश्च भवन्ति । भोक्तारः आत्मानः । एषां भोगपरिकर भूतसृष्टिमारभ्याह नित्यादीनि । पृथिवीतत्वमारभ्य कलातत्वाद्यन्तिकसूक्ष्मक-र्मणा प्राप्तस्यायुषां पूर्वशरीरं विहाय तृणजलूकवदाश्रयिष्यते । तदिदं शरीरम् ।

End :

एवं दीक्षितस्योक्तानुष्ठानवतो मुक्तस्यात्मनो लक्षणम् । आणवका-म्यमायबिन्दवरोधशक्तयाख्यपाशपञ्चकाद्विमुक्तश्च परमेश्वरवत् सर्वज्ञता, सर्वकर्तृता, नित्यतृप्तता, अनादिसिद्धस्वतन्त्रतालुप्तशाक्तिता, अनन्तशक्तिमत्ता च । एवं ये विधानामपत्मानां [एवं विधानामात्मनां] परमेश्वरवत्सृष्ट्या-दिकृत्यं नास्ति । विषयासद्भावश्च रागद्वेषादीनां विद्यायान्तता च सृष्टयन्तरे कर्तृतायाः कारणं पञ्चविधकृत्येन तु परमेश्वर एव परानुग्रहं करोतीति ।

इति सर्वमतेष्विष्टा शैवसिद्धान्तदीपिका ।
सर्वात्मशम्भुना व्यक्तं कल्पिता शैवसम्मता ॥

Fol. 34*b* is left blank.

R. No. **6635** (*b*).

(रामनाथ) सिद्धान्तदीपिका by रामनाथ ।

RĀMANĀTHA) SIDDHĀNTADĀPIKĀ by Rāmanātha.

Foll 35 to 39*a*. Lines, 7 and 8 on a page Extent, 450 granthas.

Begins on fol. 35*a* of the MS. described under R. No. 6635. Similar to the above described work by a different author. Complete.

Beginning :

शिवं प्रणम्य पत्यादिपदार्थत्रयमुच्यते ।
सर्वे पदार्थाः पत्यादित्रितयेऽन्तर्गता यतः ॥

शैवेऽस्मिन् दीक्षितैः कार्यं स्वस्वदीक्षानुरूपतः ।
नित्यं नैमित्तिकं काम्यं क्रियाश्चैतञ्च शक्तितः ॥

नित्यं नियतकालं स्यादन्यानि त्रीण्यतोऽन्यथा ।
तयोरकरणे प्रायश्चित्तं नेति शिवोदितम् ॥
वचनात्फलभेदाच्च भेदस्तेषांच वक्ष्यते ।
अनुष्ठानोपयोगार्थमेषां नित्यादिकर्मणाम् ॥
पतिः पशुश्च पाशश्च ज्ञेयस्तत्र पतिः शिवः ।
तस्य शक्तिश्च मुक्ताश्च मन्त्रेशाश्च परापरे ॥
मन्त्रा वाचकयुक्ताश्च शि[वोक्ताश्च] शिवागमाः ।

End :

परानपेक्षरूपं यद्विज्ञानं शिवसंज्ञकम् ।
तस्य शक्तिः परापेक्षं रूपमाहुर्विपश्चितः ॥
इति रत्नत्रये प्रोक्तस्तयोर्धर्मो विशेषतः ।
कालात्मकोऽध्वा पञ्चानामध्वनां व्यापको यथा ॥
तथा चतुर्णां तद्वयात्वा त्रयाणां भुवनात्मकः ।
द्वयोर्वर्णात्मकस्त्वध्वपदात्मा मन्त्रवर्त्मनः ।
अतः कलान्तर्भावेन शुद्धपञ्चाध्वना शुभाः ॥
शकाब्दयुगसाहस्रे समाप्ते न्यूनसप्तके ।
श्रीमत्पुष्पवनाधीशधामपाङ्मठवर्तिना ॥
कालेनाल्पेन सर्वेषां सिद्धान्तार्थप्रकाशिका ।
सुबोधा रामनाथेन कृता सिद्धान्तदीपिका ॥
अभिद्व्यर्थाभिम (?) पद्यैः साविंशति चतुश्शतैः ।
श्रोत्रे निवेश्य सस्नेहं सन्ततं प्रज्वलन्ति माम् ॥

Colophon :

। इति रामनाथसिद्धान्तदीपिका समाप्ता ।

Foll. 59*b* is left blank.

R. No. 6635 (*c*).

(मध्यार्जुन) सिद्धान्तदीपिका ।

(MADHYĀRJUNA) SIDDHĀNTA DĪPIKĀ.

Fol. 60 to 83. Lines 7, and 8 on a page. Extent, 600 granthas.
Begins on fol. 60*a* of the MS. described under R. No. 6635.
Complete.
Similar to the abovesaid work.

Beginning :

वन्दे मध्यार्जुनेशाख्यं शिवं शान्तं च निष्कलम् ।
परापराङ्ग[परं] गुरुं नत्वा परलक्षणाशदः (?) ॥

सिद्धान्तदीपिकां वक्ष्ये सर्वज्ञानप्रदायिनीम् ।
सर्वागमार्थनिर्णीतां विहितां संहितान्तरात् ॥

शिवाकचस्य उक्तानि वाकचमपेक्षितत्वश . . . (?)
उक्तं च कामिकागमे

उक्तानि प्रतिषिद्धानि पुनस्सम्भाषितानि च ।
सापेक्षानिरपेक्षाणि शिववाकचान्यनेकथा ॥

अथ परतन्त्राणां श्रोतॄणामवतारदर्शनाच पृथक् पृथक् संहितान्तरे ।

End :

यदुक्तं व्योमव्यापिस्तोत्रे ।

पुंसो बन्धः । शरणप्राप्तवान् प्राप्नोति गुरुसंस्थः । दीक्षाभ्युपगममनोश्शर्वः शर्वास्तु ते नमः । इति कारणद्वितीयं शं कारणाशर्वरुद्रः । प्राप्तः प्रजापतिः प्रजानां प्राणिनां पतित्वात् सृष्टिकारणात् प्रजापतिः । यदुक्त "स्रष्टा प्रजापतिर्वेधा" इति निघण्टुः । कारणतृतीयं शर्वरुद्रात् प्रजापतिः प्राप्तः ।

Colophon :

। मध्यार्जुनसिद्धान्तदीपिका समाप्ता ।

मध्यार्जुनस्थमठाधिपेन बहुशः संवीक्ष्य सर्वागमान्
शैवानां सुखबोधनाय कृपया शर्वस्य सर्वात्मनः ।
मध्यार्जुनाख्याशिवेन सन्मुक्तिदा सिद्धान्तसद्दीपिका
दीक्षाचार्यपदारविन्दमनसा क्लृप्ता सतां प्रीतये ॥

R. No. 6635 (*d*).

सिद्धान्तसमुच्चयः by त्रिलोचनशिवाचार्य ।

SIDDHĀNTASAMUCCAYA by Trilocanaśivācārya.

Foll 84—11*b* Lines, 9 and 10 on a page Extent, 900 granthas

Begins on fol. 84*a* of the MS. described under R. No. 6635.

Complete.

Similar to the work described under R. No. 6635.

Beginning :

येनानादिमलादिनिवहध्वंसाय बुद्धात्मनां
सर्वज्ञेन सदोतेन[सदातनेन] कृपया ज्ञानं समा-
विष्कृतम् ।
नत्वा तं परमं शिवं परगुरून् सर्वान् गुरूंश्चापरान्
सिद्धान्तार्थसमुच्चयो गुरुमुखात् प्राप्तः स्फुटं लिख्यते ॥
प्रमाणरचना तत्र क्रियते बहुधा यतः ।
सर्वेषु शिवशास्त्रेषु व्याख्यानेषु च दृश्यते ॥
तस्मादागमयुक्तिभ्यां यथा योऽर्णो गुरूत्तमैः ।
निर्णीतश्च तथास्माभिस्संक्षेपेण प्रदर्श्यते ॥

तत्र तावत् पारमेश्वरं ज्ञानं द्विरूपम् । अवबोधरूपं शब्दरूपं च । तत्रावबोधरूपं मालादिनिधनं सर्वार्थप्रकाशं सर्वानुग्राहकं शिवज्ञानात्मकञ्च । शब्दरूपं तु शास्त्रात्मकमेव ।

End :

इयं चतुर्विधा प्रोक्ता सबीजाबीजवर्जिता ।
साधिकारा निरधिकारा यथावदभिधीयते ॥
समयाचारसंयुक्ता सबीजा जायते नृणाम् ।
निर्बीजत्वे समर्थानां समयाचारवर्जिता ॥
नित्ये नैमित्तिके काम्ये यतः स्यादधिकारिता ।
साधिकारा भवेद्दीक्षा साधकाचार्ययोरतः ॥
निर्बीजदीक्षितानां तु तथा समयिपुत्रयोः ।
नित्यमात्रोधिकारिता त्वासाधिकारभवेद्दीक्षानिराधिकारिता (?) ॥
द्विविधैव द्विरूपापि प्रत्येकमुपजायते ।
एका क्रियावती तत्र कुण्डमण्डलपूर्विका ॥
मनोव्यापारमात्रेण या संज्ञा नवती मता । इति ।

गुरुणा पद्धत्याश्च—

निराधारोऽथ साधारो शिवस्यानुग्रहो द्विधा ।
त्रिलोचनशिवाचार्यैः सितारण्यमठाधिपैः ॥

सर्वागमात्समुद्धृत्य सिद्धान्तस्य समुच्चयम् ।
सर्वेषां शैवमुख्यानामस्माभिस्सम्यगीरितम् ॥

Colophon :

। इति सिद्धान्तसमुच्चयः ।

R. No. 6635 (*c*).

सिद्धान्तरहस्यसारः by त्रिलोचनाचार्य ।

SIDDHĀNTARAHASYASĀRAḤ by Trilocanācārya.

Fol. 112*a* to 118. Lines, 8 and 9 on a page. Extent. 200 granthas.

Begins on fol. 112*a* of the MS. described under R. No. 6635.

Complete.

A treatise on the essence of true knoledge according to the Śaivasiddhānta.

Beginning :

अथ तत्वानि षट्त्रिंशत् पृथ्व्यप्तेजोमरुद्वियत् ।
गन्धो रूपरसस्पर्शशब्दोपस्थाश्च पायु च ॥
पादौ पाणी वाक् च नासा जिह्वा चक्षुस्त्वचः श्रुतिः ।
ततोऽहङ्कारबुद्धी च प्रकृतिः पुरुषस्तथा ॥
रागो नियतिविद्या च कला कालश्च मोहिनी ।
विद्येश्वरसादाख्यौ शक्ति शिव इति स्मृताः ॥

तत्त्वरूपविकारणे—

चतुरश्रार्धचन्द्रश्च त्रिकोणश्च षडश्रकम् ।
उक्तं चेति पृथिव्यादिमण्डलाकृति यः क्रमात् ॥

तत्त्ववर्णम् –

पीतं शुक्लं च रक्तं च कृष्णं च हरितं क्रमात् ।
पृथव्यादितत्त्ववर्णानि कथितानि विशेषतः ॥

कालोत्तरे—

तत्वक्रियाधारण सङ्ग्रहपाकव्यूहादानश्च क्रियावकाशश्च ।

तत्त्वसङ्ग्रहे तत्वगुणाः—

एकाद्वित्रि चतुः पञ्च गुणा व्योमादिपञ्चसु ।
शब्दस्पर्शौ रूपश्च रसो गन्धश्च खादिषु ॥

(R. Nos. 6636 and 6637 one bundle.)

Palm leaf. 16¼ × 1⅝ inches. Foll. 11. Lines, 6 to 8 on a page. Telugu. Good.

Purchased in 1938–39 from Sri T. Ramaswami Iyangar, Tirunageśwaram of Kumbhakonam.

R. No. 6636

प्रमेयमाला by वरदसूरि ।

PRAMEYAMĀLĀ by Varadasūri.

Fol 1*a*—5*b*. Extent, 200 granthas.

The other work here in is Daśavidhavaiṣṇavalakṣaṇādi 6 (*a*) Contains Yatiliṅgasamarthana prakaraṇa. Complete.

Same work as that described under R. No. 2477.

End :

तथापि गोगिनां योगो ह्यविच्छिन्नः प्रवर्तते ।
ज्ञाता देवास्य सन्देहस्त्वं विलक्षणान्मक्रम् (?) ॥
परसंवित्स्वरूपिण्या शक्त्या परमया युतः ।
परार्थमात्रसंवित्तिरोधरूपमलच्छिदम् ॥
ज्ञानानन्दप्रदं नौमि गुरुरूपं परं शिवम् ।
त्रिलोचनेशेन सिताटवी(शैव)श . . स्तिकाद्वैतमठाधिपेन ;
विशुद्धशैवागमचक्रवर्तिनाप्यकारि सिद्धान्तरहस्यसारः ॥

Colophon :

। इति सिद्धान्तरहस्यसारो लिखितः ।

The scribe adds :

ஜயவருஷம் சித்திரைமீ ௧௨ பாண்டிகூடியிலிருக்கும் அருணசலேசுவரன் ஹஸ்தலிகிதம்.

R. No. 6637

दशविधवैष्णवलक्षणादि ।

DAŚAVIDHAVAIṢṆAVALAKHAṆĀDI.

Fol. 6*a* to 11*a*. Extent, 170 granthas.

Begins on fol. 6*a* of the MS. described under last number.

Similar to the work described under D. No. 5389.

Incomplete.

Fol. 11*b* is left blank.

Beginning :

अद्वेषश्चानुकूलश्च दिव्यनामधरस्तथा ।
चक्राङ्की मन्त्रपाठी च वैष्णवश्च ततः परम् ॥

श्रीवैष्णवः प्रपन्नश्च एकान्ती च ततः परम् ।
ततश्च परमैकान्ती दृश्यन्ते वैष्णवाः स्मृताः ॥

End :

श्रीवराहे भगवान्—

अपराधशतं लक्ष्मीः मम नित्यं कृतं भवेत् ।
क्षमाम्येकेन पद्मेन जातीपुष्पेण वा पुनः ॥
मद्भक्तं श्वपचं वापि निन्दां कुर्वन्ति ये नराः ।
पद्मकोटिशतेनापि न क्षमामि कदाचन ॥
पूजनाद्विष्णुभक्तानां पुरुषार्थोऽस्ति नेतरः ।
तेषु विद्वेषतो नास्ति किञ्चिन्नाशनमात्मनः ॥

(R. Nos. **6638** to **6647** one bundle.)

Palm leaf. $5\frac{1}{2} \times 1\frac{3}{4}$ inches. Foll. 130. Lines, 8 to 10 on a page. Malayalam. Slightly injured.

Purchased in 1938-39 from V. S. Desikacāryār of Siridamur, Tindivanam.

R. No. **6638**

कौटिल्यकथासारः by **रविनर्तक** ।

KAUṬILYAKATHĀSĀRA by Ravinartaka.

Foll. 1*a*—57*a*. Extent, 500 granthas.

The other works herein are: Śivabhujangastotram, fol. 58*a*, Viṣṇubhujaṅgastotram, fol. 67*a*, Śanistotram, fol. 71*a*, Śravaṇadvādaśīnirṇaya, fol. 76*a*, Dakṣiṇāmūrtipañjaram, fol. 84*a*, Dakṣiṇāmūrtyaṣṭakam, fol. 91*a*, Śivastotram, fol. 95*a*, Kanakadhārastava, fol 99*a*, Kāṛtaviryāpadānacampūḥ, fol. 104*a*.

Same work as that described under D. No. 12180, but with the following four stanzas in the end.

Complete.

Fol. 57*b* is left blank.

चन्द्रगुप्तो विधाय भाग्यवान् योग्यां पितृभ्रातृवधप्रतिक्रियाम् ।
गुणोत्तरं राक्षसमाप्य मन्त्रिणं नवे वयस्यन्वाशिषन्महीं सुखम् ॥

उद्रेकभाजां शत्रूणां विद्रावणमहौषधम् ।
मुद्राराक्षसनामैतद् भद्राः शृणुत पार्थिवाः ॥
तुल्यार्थं तुल्यसामर्थ्यं मर्मज्ञं व्यवसायिनम् ।
अर्धराज्यहरं भृत्यं यो न हन्यात् स हन्यते ।

अभ्युच्छ्रिते मन्त्रिणि पार्थिवे च
विष्टभ्य पादावुपतिष्ठते श्रीः ।
सा स्त्रीस्वभावादसहा भरस्य
तयोर्द्वयोरेकतरं जहाति ॥

R. No. 6639

शिवभुजङ्गस्तोत्रम् by शङ्कराचार्य ।
ŚIVABHUJAṄGASTOTRAM by Śaṅkarācārya.

Foll. 58*a* to 66*b*. Extent, 150 granthas.

Begins on fol. 58*a* of the MS. described under R. No. 6638.

Same work as that described under R. No. 61 (*o*) wherein see for beginning and R. No. 177 (*e*).

Complete :

End :

किरीटे निशेशो ललाटे हुताशो
भुजे भोगिराजो गले कालिमा च ।
तनौ कामिनी यस्य देवस्य तुल्यं
न जाने न जाने न जाने न जाने ॥

भुजङ्गप्रियाकल्पशम्भो मयेदं
भुजङ्गप्रयातेन वृत्तेन क्लृप्तम् ।
तव स्तोत्रमेतत्पठेद्यस्तु भक्त्या
कलत्रायुरारोग्यमैश्वर्यमेति ॥

अनेन स्तवेनादरादम्बिकेशं
परां भक्तिमातन्वता ये नमन्ति ।
मृतौ निर्भयास्ते लसन्तं लभन्ते
हृदम्भोजमध्ये समासीनमीशम् ॥

शिवादन्यथा दैवतं नैव जाने
महादेव शम्भो गिरीश त्रिशूलिन् !
त्वयीदं समस्तं विभातीति यस्तात्
शिवोऽहं शिवोऽहं शिवोऽहं शिवोऽहम् ॥

R. No. 6640

विष्णुभुजङ्गस्तोत्रम by शङ्कराचार्य ।

VIṢṆUBHUJAṄGASTOTRAM by Śaṅkarācārya.

Foll. 67*a*—70*b*. Extent, 35 granthas

Begins on fol. 67*a* of the MS. described under R. No. 6638.

Same work as that described under D. No. 10350.

Complete.

R. No. 6641

शनिस्तोत्रम् ।

ŚANISTOTRAM.

Foll. 71*a*—75*b*. Extent, 50 granthas

Begins on fol. 71*a* of the MS. described under R. No. 6638.

Same work as that described under D. No. 10889 with some different reading.

Complete.

R. No. 6642

श्रवणद्वादशीनिर्णयः ।

ŚRAVAṆADVĀDAŚĪNIRṆAYAḤ.

Foll 76*a*—83*b* Extent, 80 granthas.

Begins on fol. 76*a* of the MS. described under R. No. 6638.

Same work as that described under D. No. 3145 wherein see for beginning.

Incomplete.

End :

दशम्येकादशी यत्र सा नोपष्या भवेत्तिथिः ।
श्रवणेन तु संयुक्ता सा चेत्स्यात्सर्वकामदा ॥

इति वह्निपुराणादित्युक्ता मदनरत्ने । पूजा च मध्याह्ने कार्या । "अहो मध्ये वामनो रामरामौ" इति पूर्वोक्तवचनात् अत्रैव दुग्धव्रतं सङ्कल्पयेत् । तदुक्तं दुग्धमाश्वयुजे मासीति । अत्रेदं चिन्त्यते ।

R. No. 6643

दक्षिणामूर्तिपञ्जरम् ।

DAKṢIṆĀMŪRTIPAÑJARAM.

Foll. 84*a* to 90*b*. Extent, 80 granthas.

Begins on fol. 84*a* of the MS. described under R. No. 6638.

Complete as found in the Brahmāṇḍapurāṇa.

Same work as that described under D. No. 6376, but with the addition of the following stanzas in the beginning and slight difference in the Colophon. :—

प्रणम्य साम्बमीशानं शिरसा वैणिको मुनिः ।
विनयावनतो भूत्वा पप्रच्छ स्कन्दमादरात् ॥

नारदः—

भगवन् परमेशान सम्प्राप्ताखिलशास्त्रक ।
स्कन्द सेनापते स्वामिन् पार्वतीप्रियनन्दन ॥

यज्ञपात्कविता विद्या शिवे भक्तिश्च शाश्वती ।
अवाप्तिरणिमादीनां सम्पदः प्राप्तिरेव च ॥

भूतप्रेतपिशाचानामगम्यत्वमरोगता ।
महाविज्ञानसम्प्राप्तिर्महाराजसुपूजनम् ॥

वरप्रसादो देवानां महाभोगार्थसम्भवः ॥

Colophon :

इति ब्रह्माण्डे महापुराणे गुहनारदसंवादे उत्तरभागे उपरिखण्डे श्रीदक्षिणामूर्तिपञ्जरं नाम अष्टाशीतितमोऽध्यायः ।

R. No. 6644

दक्षिणामूर्त्यष्टकम् by शङ्कराचार्य ।

DAKṢIṆĀMŪRTYAṢṬAKAM by Śaṅkarācārya.

Foll 91*a* to 94*a* Extent, 25 granthas.

Begins on fol. 91*a* of the MS. described under R. No. 6638.

Same work as that described under R. No. 118 (*b*).

Complete.

Fol. 94*b* is left blank.

R. No. 6645

शिवस्तोत्रम् ।

ŚIVASTOTRAM.

Fol. 95*a* to 98*a*. Extent, 40 granthas.

Begins on fol. 95*a* of the MS. described under R. No. 6638.

Similar to the work described under D. No. 11228.

Complete.

Fol. 98*b* is left blank.

Beginning :

वसिष्ठ उवाच—

ततस्तद्भक्तियोगेन संप्रीतात्मा जगत्पतिः ।
प्रत्यक्षमगमत्तस्य सर्वैस्सह मरुद्गणैः ॥
तं दृष्ट्वा देवदेवेशं त्रिनेत्रं चन्द्रशेखरम् ।
वृषेन्द्रवाहनं शम्भुं भूतकोटिसमन्वितम् ॥
ससंभ्रमं समुत्थाय हर्षेणाकुललोचनः ।
प्रणाममकरोद्भक्त्या शर्वाय भुवि भार्गवः ॥

End :

वसिष्ठः—

इति स्तुतस्तदा तेन भक्त्या रामेण शङ्करः ।
मेघगंभीरया वाचा तमुवाच हसन्निव ॥

R. No. 6646

कनकधारास्तवः by शङ्कराचार्य ।

KANAKADHĀRĀSTAVAḤ by Śaṅkarācārya.

Foll. 99*a*—103*b*. Extent, 50 granthas. Printed

Begins on fol. 99*a* of the MS. described under R. No. 6638.

Incomplete.

Same work as that described under D. No. 9708 with some differences.

Here some stanzas have been added while some have been left.

End :

अरुणनलिनसंस्था सान्द्रजःपुञ्जवर्णा(?)
करकमलधृतेष्टाभीष्टयुग्माम्बुजा च ।
मणिमकुटविचित्रालङ्कृता कल्पजाता
भवतु भुवनमाता सन्ततं श्रीः श्रियै नः ॥

लक्ष्मीर्बिल्ववने कदम्बकुसुमे दिव्याङ्गना कुञ्जरे
श्वेताश्वे मणिगोपुरे च धवले चित्रध्वजे चामरे ।
हंसे पद्मवने नरेन्द्रभवने गङ्गाजले गोकुले
सत्ये सौरवचे(ने)(स) छक्षणगृहे श्रीविष्णुवक्षस्थले ॥

The scribe adds :

यादृशं पुस्तके दृष्टं तादृशं लिखितं मया ।
यदि युक्तमयुक्तं वा मम दोषो न विद्यते ॥

कारुण्यकर्पूरकटाक्षनिरीक्षणेन
तारुण्यसंवलितशैशववैभवेन ।
आपुष्णता भुवनमद्भुतविक्रमेण
श्रीकृष्णचन्द्र शिशिरीकुरुलोचनं मे ॥

रामेण लिखितमिदं पुस्तकम् ।

R. No. 6647

कार्तवीर्यापदानचम्पूः ।

KĀRTAVĪRYĀPADĀNACAMPŪḤ.

Foll. 104*a* to 130*b*. Extent, 300 granthas.

Begins on fol. 104*a* of the MS. described under R. No. 6638.

Complete.

A campu work (in prose and poetry) describing the story of the combat between Rāvaṇa and Kārtavīryārjuna who defeated the former. The story ends with the imprisonment of Ravaṇa.

Beginning :

कल्याणानि चरीकरीति मुरलीविन्यस्तबिम्बाधरं
चञ्चत्काञ्चनमेखलाञ्चितनितम्बालम्बि पीताम्बरम् ।
नन्दानन्दनमिन्दिराकुचतटीपाटीरपङ्काङ्कितं
यज्ज्योतिः परिचर्करीति निकषा घोषं तटं यामुनम् ॥

* * * * *

गम्भीरशास्त्रार्थविदः कवीन्द्राः
अपि प्रमाद्यन्ति कृतौ कृतिज्ञाः ।
अतोऽत्र काव्य परिशोधनाय
